प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तद्दलस्यार्थाभिन्नस्यार्थे द्विगुरुच्यते । तत्र तद्धितार्थद्विगुं लक्षयति ।

"तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्म्मतः ।
तद्धितार्थे लाक्षणिकस्वान्त्यनाम त्वसेव्वगः ॥
यो द्विगुः स उत्तरतद्धितार्थान्वितस्वार्थकः ॥"

उत्तरपदद्विगुं लक्षयति ।

"स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः ।
यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः ॥"

यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः । यथा पञ्चगवधनः । समाहारद्विगुं लक्षयति ।

"स्वार्थान्वितसमाहारलक्षकः स्वान्त्यशब्दकः ।
उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः ॥"

स्वोपस्थाप्यार्थस्य समाहारलक्षको यदीयान्त्यशब्दः स द्विगुः समाहारद्विगुः । यथा पञ्चपुलीत्यादि ॥ २ ॥ तत्पुरुषं लक्षयति ।

"यदीयेन सुबर्थेन युतयद्बोधनक्षमः ।
यः समासस्तस्य तत्र स तत्पुरुष उच्यते ॥"

यदर्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति यः समासः स्वरूपयोग्यः स तदर्थस्य तदर्थे तत्पुरुषः । न तु यन्नामोत्तरं यन्नाम यदर्थगतसुबर्थावच्छिन्नस्य यत् स्वार्थस्य बोधकं तदुत्तरतन्नामैव तदर्थयोस्तत्पुरुषः । पूर्व्वकायोऽर्द्धपिप्पलीत्यादावव्याप्तेः । विभजते ।

"द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः ।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र
योजितः ॥" ३ ॥

अव्ययीभावं लक्षयति ।

"उत्तरार्थान्वितस्वार्थाव्ययपूर्व्वस्तु यो भवेत् ।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः ॥"

यः समासः सोऽत्तरपदोपस्थाप्येन यदर्थेनान्वितस्य यदर्थस्य बोधकाव्ययपूर्व्वभागकः स तद्विशिष्टस्य तदर्थस्य बोधने अव्ययीभावः । यथा निर्मक्षिकं उपकुम्भमित्यादि ।

"अमादेशं विना श्रूयमाणषष्ठी न बोधिका ।
स्वार्थे यदर्थस्य यत्र सोऽव्ययीभाव इष्यते ॥"

अमादेशं विना श्रूयमाणषष्ठी स्वार्थे यत् समासार्थस्यान्वयबोधं प्रत्यसमर्था स एव वाव्ययीभावः श्रूयमाणैव षष्ठी स्वार्थे समासान्तरार्थस्यान्वयबोधनेऽसमर्था न तु लुप्तापि ॥ ४ ॥ बहुव्रीहिं लक्षयति ।

"बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः ।
निरूढ्या लक्षणया स्वांशज्ञापकशब्दवान् ॥"

स्वांशस्य निरूढलक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य यादृशार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधने बहुव्रीहिः ।

"अस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह ।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः ॥"

अस्य बहुव्रीहेर्घटकमेकं नाम प्रथमान्तं सत् सुबन्तैरितरनामभिः सह भेदार्थकसुबन्तयच्छब्देन साकाङ्क्षं विग्रहः कथ्यते । बहुव्रीहिं विभजते ।

"तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः ।
विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत् ॥"

तत्र विग्रहवाक्यस्य विशेष्यविधया प्रत्याय्यो योऽर्थस्तद्विशेष्यकबोधकृत् बहुव्रीहिस्तयोरादिमः तद्गुणसंविज्ञानः । तस्य स्वार्थगुणीभूतस्य सम्यग्विशेष्यविधया विज्ञानं यस्मिन्निति व्युत्पत्त्या स्वार्थान्वयः संज्ञात्वात् तद्भिन्नस्यातद्गुणसंविज्ञानस्वरम इत्यर्थादवगम्यते । प्राचां मतेन तद्गुणसंविज्ञानबहुव्रीहिमन्यथा निर्व्वक्ति ।

"यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने ।
अनुकूलो बहुव्रीहिः स तयोरथवादिमः ॥"

यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्याप्यर्थस्यान्वयबोधने समर्थः स तयोस्तद्गुणातद्गुणयोरादिमः । लम्बकर्णमानय हारग्रीवं पश्य इत्यादि । पुनर्विभजते ।

"स्वान्तर्निविष्टद्वित्र्यादिनामभिर्विग्रहात् पुनः ।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः ॥"

द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रहवशात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहिर्बोध्यः ॥ ५ ॥ द्वन्द्वं लक्षयति ।

"यद्यदर्थकयन्नामव्यूहो यद्वत्प्रकारके ।
बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः ॥"

यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामस्तोमस्य निश्चयस्तदर्थप्रकारकान्वयवोधं प्रति तत्त्वेन समर्थस्तादृशनामनिवह एव तावदर्थको द्वन्द्वसमासः । द्वन्द्वं विभजते ।

"द्वौ भेदावस्य शाब्दोक्तौ समाहारेतरेतरौ ।
एकान्यवचनाकाङ्क्षा हानोपादानतश्च तौ ॥"

अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शाब्दसिद्धौ । तत्रैकवचनान्यसुबाकाङ्क्षाविहीनः समाहारः । तथाविधसुबाकाङ्क्षस्तितरेतरः । यथा । पाणिपादं हस्त्यश्वं धवखदिरौ । इत्यादि ॥ ६ ॥ उपपदसमासं लक्षयति ।

"यदुत्तरपदं नामानुत्तरं यद्बोधकम् ।
धातुकृत्सुपपदसमासः स तदन्तकः ॥"

धातुकृद्भ्यां निष्पन्नं यस्योत्तरपदं शब्दानुत्तरं स यादृशार्थस्य बोधं प्रत्यसमर्थं तादृशार्थे तादृशार्थकान्यपदकः समास उपपदसंज्ञकः । कुम्भकारः क्षीरपायीत्यादि । विभजते ।

"कारकैकोपपदकः षड्विधोऽयमिति भ्रमः ।
कर्म्मकर्त्राद्युपपदभेदात् बहुविधस्त्वसौ ॥" ७ ॥

इति शब्दशक्तिप्रकाशिका ॥

समासक्तः, त्रि, (सम् + आ + सञ्ज + क्तः ।) संयुक्तः । यथा, कर्पूरादिस्तोत्रे ।

"त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥"

समासञ्जनं, क्ली. (सं + आ + सञ्ज + ल्युट् ।) समासङ्गः । मेलनम् । संयोगः । समाङ्पूर्व्वकसन्जधातोरनट्प्रत्ययेन निष्पन्नम् ॥

समासन्नं. त्रि, निकटस्थम् । समाङ्पूर्व्वसदधातोः क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, रघुः । १० । ३५ ।

"अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः ॥")

समासवान्, [त्] पुं, (समासः संक्षेपोऽस्त्यस्येति । समास + मतुप् । मस्य वः ।) तुन्नष्टचः । इति शब्दचन्द्रिका ॥ समासविशिष्टे, त्रि ॥

समासादितः, त्रि, (सम् + आ + सद् + णिच् + क्तः ।) आहृतः । प्राप्तः । समाङ्पूर्व्वण्यन्तसदधातोः क्तप्रत्ययेन निष्पन्नः ॥

समासाद्यं, त्रि, (सम् + आ + सद् + ण्यत् ।) प्राप्यम् । इत्यमरः ॥ अनुस्वारशून्यश्चेत् प्राप्त्यनन्तरबोधकक्रिया ॥ (यथा, महाभारते । ५ । १६ । १६ ।

"अपां फेनं समासाद्य विष्णुतेजोऽभिबृंहितम् ।
त्वया वृत्रो हतः पूर्व्वं देवराज ! जगत्पते ! ॥")

समासार्था, स्त्री, (समासेन संक्षेपेण अर्थो यस्याः ।) समस्या । श्लोकस्य पादेनैकेन द्वाभ्यां त्रिभिर्व्वा पूरणम् । इत्यमरभरतौ ॥

समाहरणं, क्ली, (सं + आ + हृ + ल्युट् ।) समाहारः । समाङ्पूर्व्वकहृञ्धातोरनट्प्रत्ययेन निष्पन्नम् ॥

समाहारः, पुं, (सं + आ + हृ + घञ् ।) समुच्चयः । इत्यमरः ॥ बहूनां भिन्नानां वाह्यव्यापारेण बुद्ध्या वा पञ्चमूली त्रिभुवनवत् राशीकरणम् । इति भरतः ॥ संक्षेपः । यथा,

"समासस्तु समाहारः संक्षेपः संग्रहोऽपि च ।"
इति हेमचन्द्रः ॥

समाहारद्वन्द्वसमाहारद्विगुसमासयोर्व्विवरणं समासशब्दे द्रष्टव्यम् ॥

समाहितः, त्रि, (सम् + आ + धा + क्तः ।) समाधिस्थः । (यथा, देवीभागवते । १ । १७ । ६६ ।

"स्नात्वा प्रातःक्रियां कृत्वा पुनरास्ते समाहितः ॥")

उक्तसिद्धान्तः । आहितः । निर्व्विवादीकृतः । प्रतिज्ञातः । इति मेदिनी ॥ निष्पन्नः । इति धरणिः ॥ शुचौ, पुं । इति शब्दरत्नावली ॥

समाहृतः, त्रि, सम्यक्प्रकारेण आहरणीकृतः । संगृहीतः । एकत्रीकृतः । संक्षेपेण प्रतिपादितः । समाङ्पूर्व्वकहृधातोः क्तप्रत्ययेन निष्पन्नः ॥

समाहृतिः, स्त्री, (सम् + आ + हृ + क्तिन् ।) संग्रहः । इत्यमरः ॥ एककर्तृकाणामनेककर्तृकाणां वा एकाभिप्रायाणां वाक्यानां समाहरणं समाहृतिः । समाह्रियते संक्षेपेण प्रति-) पद्यते अनया समाहृतिः । संपूर्व्वात् आङ्पूर्व्वात् हृ ञ हरणे इत्यस्मात् क्तिः । इति भरतः ॥

समाह्वयः, पुं, (समाहूयतेऽनेनेति । सम् + आ + ह्वे + पुंसीति घः । बाहुलकात् नात्वम् ।)